न्द्रा॑द्भि॒याम॑रुतो॒रेज॑मानः। यु॒ष्मभ्यं॑
ह॒व्यानिशि॑तान्यास॒न् तान्या॒रेच॑-
कृमामृ॒ळता॑नः॥ ४॥

ऋ०मं०१ सू०१७१ मं०४ (४७३६)

अ॒स्मात्	अस्मात्	इस से
अ॒हम्	अहम्	मैं
त॒वि॒षात्	बलवतः	बलवान् से
ईष॑माणः	पलायमानः	भागता हुआ
इन्द्रा॑त्	इन्द्रात्	इन्द्र से
भि॒या	भीत्या	डर से
म॒रु॒तः॒	हे मरुतः !	हे मरुतो
रेज॑मानः	कम्पमानः	कांपता हुआ
यु॒ष्मभ्य॑म्	युष्मभ्यम्	तुम्हारे लिये
ह॒व्या	हव्यानि	हवियें
निऽशि॑तानि	सम्पादितानि	तैयार की हुईं

आसन्	आसन्	थीं
तानि	तानि	उन को
आरे	दूरे	दूर में
चकृम	कृतवन्तःस्मः	हमने किया है
मृळत	कृपांकुरुत	कृपा करो
नः	अस्मभ्यम्	हमारे लिये

संस्कृतार्थः ।

हे मरुतः ! अहमस्माद् बलवत इन्द्रात् पलायमानो भीत्या कम्पमानः(चाऽस्मि) युष्मभ्यं हव्यानि सम्पादितानि आसन् तानि (वयम्) दूरे कृतवन्तः स्मः, (यूयम्) अस्मभ्यं कृपांकुरुत ॥ ४ ॥

भाषार्थः ।

हे मरुतो ! मैं इस बलवान् इन्द्र से भागता हुआ (और) डर से कांपता (हूं) आपके लिये हवियें तैयार रखो थीं उन को हमने दूर कर दिया है, आप हम पर कृपा करो ॥ ४ ॥

जैसा पिछले सूक्त में वर्णन है, केवल मरुतों के लिये हवि तैय्यार करने से ऋषि को हृदय विलेख हुआ इस सूक्त में ऋषि ने इन्द्र को मना कर अपनी आत्मा की तुष्टि की इस में मरुतों को मनाते हैं—

इन्द्रोदेवताः, त्रिष्टुप्छन्दः ।११।११।११।११

येनमानासश्चितयन्तउस्रा
व्युष्टिषशवसाशश्वतीनाम्। सनो
मरुद्भिर्वृषभश्रवोधा उग्रउग्रेभिः
स्थविरःसहोदाः ॥ ५ ॥

येन	येन	जिस से
मानासः	मानपुत्राः	मान के पुत्र
चितयन्ते	चिन्तयन्ति	चिन्तन करते हैं

उ॒स्राः	प्रातःकालान्	प्रातःकालों को
विऽउ॑ष्टिषु	(उषसाम्) प्रादुर्भूतिषु	(उषाओं के) खिलने पर
श॑वसा	बलेन	बल से
शश्व॑तीनाम्	नित्यानाम्	सदा होनेवालियों के
सः	सः	वह
न॒ः	अस्मभ्यम्	हमारे लिये
म॒रुत्ऽभि॑ः	मरुद्भिः	मरुतों से
वृ॒ष॒भ॒	हे वीर !	हे बीर
श्र॑वः	यशः	यश को
धा॒ः	धारय	धारण कर
उ॒ग्रः	भयानकः	भयानक
उ॒ग्रेभि॑ः	भयानकैः	भयानकों से

ऋ०मं०१ सू०१७१ मं०६ (५७४०)

स्थवि॑रः	पुरातनः	प्राचीन
स॒हः॒ऽदाः	बलप्रदः	बल के देने वाला

संस्कृतार्थः ।

हे वीर ! (इन्द्र !) येन (तव) बलेन नित्यानाम् (उषसाम्) प्रादुर्भूतिषु मानपुत्राः प्रातःकालान् चिन्तयन्ति (तेन) पुरातनो भयानको बलप्रदः (चत्वम्) भयानकैर्मरुद्भिः सह अस्मभ्यं यशो-धारय ॥ ५ ॥

भाषार्थः ।

हे बीर (इन्द्र !) (आपके) जिस बल से नित्य होने वाली (उषाओं) के लिखने पर मान के पुत्र प्रातःकालों का चिन्तन करते हैं (उस से) प्राचीन, भयानक और बल के देने वाले आप भयानक मरुतों के साथ हमारे लिये यश को धारण करें ॥ ५ ॥

इन्द्रोदेवता:, त्रिष्टप्छन्दः ।११।११।११।११

त्वं॑प्राहीन्द्रसही॑यसोनॄन् भवा॑

मरुद्भिरवयातहेळाः । सुप्रकेतेभिः
सासहिर्दधानो विद्यामेषं वृजनं जीर-
दानुम् ॥ ६ ॥

त्वम्	त्वम्	तू
पाहि	रक्ष	रक्षा कर
इन्द्र	हे इन्द्र!	हे इन्द्र
सहीयसः	अतिबलवतः	अत्यन्त बलवानों को
नॄन्	नरान्	वीरों को
भव	भव	तू हो
मरुत्ऽभिः	मरुद्भिः	मरुतों के साथ

अवयात-ऽहेळाः	अपगतक्रोधः	क्रोध से रहित हुआ २
सुऽप्रकेतेभिः	सुप्रज्ञानवद्भ्यः ,,	अत्यन्त बुद्धिमानों से
ससहिः	जयशील	जयशील
दधानः	धारयन्	धारण करता हुआ
विद्याम	प्राप्नुयाम	हम प्राप्त करें
इषम्	अन्नम्	अन्न को
वृजनम्	बलम्	बल को
जीरऽदानुम्	शीघ्रदानशीलताम्	शीघ्र दान देने के स्वभाव को

संस्कृतार्थः।

हे इन्द्र ! जयशीलः (त्वम्) सुप्रज्ञानवद्भिः मरुद्भिः (सह) अपगतक्रोधो भव (तान्) अतिबलवतो

वीरान् धारयन् सन् रक्ष (वयम्) अन्नं बलं शीघ्रदानशीलताम् (च) प्राप्नुयाम ॥ ६ ॥

भाषार्थः ।

हे इन्द्र ! जयशील आप अत्यन्त बुद्धिमान मरुतों के सहित क्रोध को दूर करें, (और उन) अत्यन्त बलवान् वीरों को धारण करते हुए रक्षा करें, हम अन्न बल (और) शीघ्र दान देने के स्वभाव को प्राप्त करें ॥६॥

इत्येकसप्तत्युत्तरशततम सूक्तम् ।

ऋ० मं०१ सू० १७२

मरुतोदेवता, अगस्त्यऋषिः ।

विनियोगोलैङ्गिकः-

सूक्त का भावार्थ।

हे सर्प की कान्ति वाले और कल्याण के देने वाले मरुतो ! आपका आगमन प्रत्यक्ष हो और आपकी रक्षा प्रत्यक्ष हो ॥१॥ हे मंगल के देने वाले मरुतो ! वह आपकी वेग से चलने वाली बर्छी हम से दूर रहे और वह वज्र दूर रहे जिसको आप फेंकते हो ॥२॥ हे शुभ के देने वालो ! तृणस्कन्द की प्रजा को न मारो, और हमारा जीवन उच्च करो ॥ ३ ॥

मरुतोदेवताः, निचृद्गायत्रीछन्दः ।७।८।८।

चि॒त्रोवो॑ऽस्तु॒याम॑श्चि॒त्रऊ॒ती
सु॑दानवः । मरु॑तो॒अहि॑भानवः ॥ १ ॥

चि॒त्रः	प्रत्यक्षः (आ०को०)	प्रत्यक्ष
वः॒	युष्माकम्	तुम्हारा
अ॒स्तु	अस्तु	हो

याम॑ः	आगमनम्	आना
चि॒त्रः	प्रत्यक्षः	प्रत्यक्ष
ऊ॒ती	रक्षा	रक्षा
सु॒ऽदा॒न॒व॒ः	हे कल्याणदानाः ! (यास्कः)	हे कल्याण के देने वालो !
म॑रुतः	हे मरुतः !	हे मरुतो
अहि॑ऽभा-नवः	हे सर्पद्युतियुक्ताः !	हे सर्प की कान्ति वालो

संस्कृतार्थः ।

हे सर्पद्युतियुक्ताः ! कल्याणदानाः ! मरुतः ! युष्माकमागमनं प्रत्यक्षं रक्षणम् (च) प्रत्यक्षम् (अस्तु) ॥ १ ॥

भाषार्थः ।

हे सर्प की कान्ति वाले, कल्याण के देने वाले मरुतो ! आपका आगमन प्रत्यक्ष (और) रक्षा प्रत्यक्ष हो ॥ १ ॥

मरुतोदेवताः, गायत्रीछन्दः।८।८।८।

आरेसावःसुदानवो मरुतऋञ्जतीशरुः। आरेअश्मायमस्यथ॥२॥

आरे	दूरे	दूर
सा	सा	वह
वः	युष्माकम्	तुम्हारी
सुदानवः	हे कल्याणदानाः!	हे कल्याण के देने वाले
मरुतः	हे मरुतः !	हे मरुतो
ऋञ्जती	जवेन प्रचलन्ता	वेग से चलने वाली
शरुः	शक्तिः	बर्छी
आरे	दूरे	दूर

अश्मा	वज्रः	वज्र
यम्	यम्	जिसको
अस्यथ	क्षिपथ	फैंकते हो

संस्कृतार्थः ।

हे कल्याणदानाः ! मरुतः ! सा जवेन प्रचलन्ती युष्माकंशक्तिर्दूरे (भवतु) वज्रः (च) दूरे (भवतु) यं क्षिपथ ॥ २ ॥

भाषार्थः ।

हे कल्याण के देने वाले मरुतो ! वह आपकी वेग से चलने वाली बर्छी दूर (हो) (और) वज्र दूर (हो) जिसको फैंकते हो ॥ २ ॥

मरुतोदेवताः, गायत्रीछन्दः ।८।८।८।

तृणस्कन्दस्यनुविशः परिवृङ्क्त सु-
दानवः । ऊर्ध्वान्नःकर्तजीवसे ॥३॥

ऋ०मं०१सू०१७२ मं०३ (४७४८)

तृ॒णा॒ऽस्क॒न्दस्य॑	तृणस्कन्दस्य	तृणस्कन्द की
नु	खलु	सचमच
विशः॑	प्रजाः	प्रजाओं को
परि॑	परि +	–
वृ॒ङ्क्त॒	परि + वृङ्क्त, परिवर्जयत	छोड़ दो
सु॒ऽदा॒न॒वः॒	हे कल्याणदानाः!	हे कल्याण के देने वाले
ऊ॒र्ध्वाँन्	ऊर्ध्वान्	ऊपर
नः॒	अस्मान्	हम को
क॒र्त॒	कुरुत	करो
जी॒वसे॑	जीवनार्थम्	जीने के लिये

संस्कृतार्थः ।

हे कल्याणदानाः (मरुतः ! यूयम्) तृणस्कन्दस्य प्रजाः खलु परिवर्जयत, अस्मान् (च) जीवनाथ-मूर्धान् कुरुत ॥ ३ ॥

भाषार्थः ।

हे कल्याण के देने वाले (मरुतो !) सचमुच आप तृणस्कन्द की प्रजाओं को छोड़ दो (और) हम को जीने के लिये उच्च बनाओ ॥ ३ ॥

'तृणस्कन्द' किसी का नाम प्रतीत होता है जो या तो ऋषि का पूर्वज हो या उस समय का राजा हो। छोड़ दो अर्थात् न मारो ॥

इति द्विसप्तत्यधिकशततमं सूक्तम् ।

ऋ० मं०१ सू० १७३

इन्द्रोदेवता, अगस्त्यऋषिः ।

विनियोगः-

१-१३। एतत्सूक्तं समूल्हे दशरात्रे तृतीये छन्दोमे मरुत्वतीयशस्त्रे विनियुक्तम् (आ० ८।७।२३)

सूक्त का भावार्थ ।

उद्गाता पक्षी की न्याईं दिव्य साम को गावे, हम प्रकाश की न्याईं बढ़ते हुए उस सोम का आदर करते हैं, क्योंकि कुशों से ढकी हुई वदी पर इन्द्र की पूजा के लिये हमारी गौओं का जिन को कोई मार नहीं कर सकता दूध तैय्यार है ॥ १ ॥ घोर इन्द्र भूखे हिरण की न्याईं उद्योग करते हुए स्वयं प्रेरण की हुई हविया से 'वीर' ऋत्विजों द्वारा अपना पूजन कराते हैं, हे उद्यमी ! पूजनीय आप स्तुति के उत्सुक हो, इसलिये मनुष्य होता याज्या और अनुवाक्या रूप दो दो स्तुतियां प्रत्येक आहुतिके साथ उच्चारण करता है ॥ २ ॥ होतारूप सूर्य मापे हुए रस्ते से पृथिवी के चारां ओर चलता है और शरद् से पहिले उस में गर्भ को धारण करता है, फिर तो घास को खाता हुआ घोड़ा हिनहिनाता है, गौओं की ओर ले जाया जाता हुआ बैल डकारता है और द्यौ और पृथिवी के बीच में यज्ञ करने वालों की स्तुति की वाणी दूती की न्याईं चलती है ॥ ३ ॥ हमने इन्द्र के लिये रुचिकारक हवियों को तैय्यार किया है, देवभक्त उत्तेजन करने वाले स्तोत्रों को अर्पण करते हैं, अद्भुत तेज वाले इन्द्र जो अश्विनों की न्याईं सहज से चलने वाले और रथ पर बैठने वाले हैं उन हवि और स्तोत्रों को स्वीकार करें ॥ ४ ॥ उस इन्द्र की ही स्तुति करो जो सचमुच बलवान, शूरवीर, धनवान और रथ पर बैठने वाला है,

जो सब योद्धाओं से अधिक योद्धा, नर घोड़ों वाला और जगत को ढकने वाले अन्धकार का नाश करने वाला है ॥ ५ ॥ जो महत्त्व के कारण मनुष्यों से आगे बढ़ा हुआ है उस इन्द्र के लिये द्यौ और पृथिवी कमरचन्द के लिये भी पर्याप्त नहीं हैं, उस स्वतन्त्र ने पृथिवी को अलक की न्याई और द्यौ को मुकुट की न्याईं पहना है ॥ ६ ॥ हे शूरवीर इन्द्र ! जो पृथिव्यादि लोक स्तोता को अन्नों से अनुमोदन करते हैं वे अन्धकार आदि शत्रुओं से लड़ने के लिये सज्जनों के वरने वाले, और सब से लंबी यात्रा करने वाले आप को मद से युक्त करते हैं ॥ ७ ॥ हे इन्द्र ! अन्तरिक्ष में आप के लिये जो सोम की आहुतियां दी जाती हैं यह उन्हीं का कल्याणकारक फल है जो प्रजाओं में दिव्य जल रमण करते हैं, जब आप स्तुति किये जाकर स्तोताजनों को चाहते हो तब सारी वाणी अनुकूलता से आप की सेवा करने वाली होजाती है ॥ ८ ॥ हे स्वामी ! ऐसा करो, जिस प्रकार हम अच्छे मित्र वाले और सुरक्षक से युक्त हों, जैसे मनुष्य मनुष्यों की स्तुति ले होते हैं, और जिस प्रकार आप इन्द्र हमारी स्तुति में ठैरने वाले हों, और जैसी हम स्तुति करते हैं वैसे हमारे कर्म भी शीघ्र हो जावें ॥ ९ ॥ जैसे मनुष्य मनुष्यों की स्तुति से स्पर्धा को त्याग कर स्तुति करने वाले का होजाता है वैसे इन्द्र हमारे हों, जैसे गढ़ के बीच रहने की इच्छा करने वाले लोग अच्छे शासन के लिये नगर के स्वामी को कर देते हैं वैसे मित्र की कामना वाले यज्ञों द्वारा इन्द्र को कर देते हैं ॥१०॥ कई मनुष्य यज्ञ से तो इन्द्र की सेवा करते हैं परन्तु मन से कुटिल हुए २ विचरते हैं, जैसे प्यासे को लंबे रस्ते में जल का स्थान न मिले वैसे वे मनुष्य सिद्धि को नहीं प्राप्त होते । ११ हे बलवान इन्द्र । आप हमें महा युद्धों में न त्यागो । क्योंकि हमने देवताओं में आपके लिये ही हवि का भाग दिया है और हम हवि देने वालों की वाणी आपके प्रिय मरुतों की स्तुति करती है ॥१२॥

ऋ०मं०१।सू०१७३ मं०१ (४७१२)

हे घोड़ों वाले इन्द्र! यह हमारा स्तोत्र आपके लिये है. इससे हमारे लिये कल्याण के मार्ग को प्रदान करो, हे देव ! कल्याण के लिये हमारी ओर फिरो, हम अन्न बल और शीघ्र दान देने के स्वभाव को प्राप्त करें ॥ १३ ॥

इन्द्रोदेवता, त्रिष्टुप्छन्दः ।१२।१२।१२।१२।

गायत्सामनभन्यं१यथावेरर्चा-
मतद्वावृधानंस्वर्वत् । गावोधेनवो
बर्हिष्यदब्धा आयत्सद्मानंदिव्यं
विवासान् ॥ १ ॥

गायत्	गायेत्	गावे
साम	साम	साम को
नभन्यम्	दिव्यम्	दिव्य को
यथा	यथा	जैसे
वेः	पक्षी (प्रथमार्थे षष्ठी)	पक्षी

(७७५१) ऋ०मं०१ सू०१७३ मं०१

अर्चाम	सत्कुर्महे (लडर्थेलोट्)	हम आदर करते हैं
तत्	तत्	उस को
वावृधानम्	वर्धमानम्	बढ़ते हुए को
स्वःऽवत्	प्रकाशवत्	प्रकाश की न्याईं
गावः	गावः	गौएं
धेनवः	दोग्ध्र्यः	दूध देने वालीं
बर्हिषि	बर्हिषि	कुशों पर
अदब्धाः	अहिंसिताः	हिंसा से रहित
आ	आ+	–
यत्	यतः	क्योंकि
सद्मानम्	सीदन्तम्	बैठते हुए को
दिव्यम्	दिव्यम्	दिव्य को

सा०वे०१ [illegible] मं०२ ([illegible])

विवासान्	आ+विवासान्, सर्वतः परिचरन्ति	सब ओर से सेवा करता हैं

संस्कृतार्थः ।

(उद्गाता) पक्षी इव दिव्यं साम गायेत् वयम्) प्रकाशवद् वर्धमानं तत् (साम) सत्कुर्महे, यतोऽहिंसिता दोग्ध्र्यो गावो बर्हिषि सीदन्तं दिव्यम् (इन्द्रम्) सर्वतः परिचरन्ति ॥ १ ॥

भाषार्थः ।

(उद्गाता) पक्षी की न्याईं दिव्य साम को गावे, हम प्रकाश की न्याईं बढ़ते हुए उस (साम) का आदर करते हैं, क्योंकि हिंसा से रहित दूध देने वाली गौएँ कुशों पर बैठने वाले दिव्य (इन्द्र) की सब ओर से सेवा करती हैं॥ १ ॥

इन्द्रो देवता, निचृत्त्रिष्टुप्छन्दः। ११।११।१०।११।

अर्चद्वृषावृषभिःस्वेदुहव्यैर्मृगोनाश्नोअतियज्जुगुर्यात्। प्रमन्दयुर्मनांगूर्तहोता भरतेमर्योमिथुनायजत्रः ॥ २ ॥

अर्चत्	अर्चयति	पूजता है
वृषा	वीरः	वीर
वृषऽभिः	वीरैः	वीरों के द्वारा
स्वऽदुष्टु-हव्यैः	स्वप्रेरितैर्हव्यैः	आप प्रेरण की हुई हवियों से
मृगः	हरिणः	हिरन
न	इव	की न्याईं
अश्नः	बुभुक्षितः	भूखा
अति	अति+	–
यत्	यः (विभक्तेर्लुक)	जो
जुगुर्यात्	अति+जुगुर्यात्, अत्यर्थमुद्युङ्क्ते	अत्यन्त उद्यम करता है

ऋ०सं०सू०१७३ मं०२ ([illegible])

प्र	प्र+	–
म॒न्द्यु॒ः	स्तुतिकामः	स्तुति चाहने वाला
म॒नाम्	स्तुतिम्	स्तुति को
गू॒र्त॒	हे उद्यमिन् !	हे उद्यमी
होता॑	होता	होता
भर॑ते	प्र+भरते, अर्पयति	अर्पण करता है
मर्य॑ः	मनुष्यः	मनुष्य
मि॒थु॒ना	मिथुनौ	जोडों का
य॑जत्रः	यजनीयः	पूजने योग्य

संस्कृतार्थः ।

वीरः (इन्द्रः) यः बुभुक्षितो हरिण इव अत्यर्थमुपभुङ्क्ते स्वप्रेरितैर्हठयैर्वीरैः (ऋत्विग्भिरात्मानम्) अर्पयति, हे उद्यमिन् ! यजनीयः (त्वम्) स्तुति-

कामः (अस्ति) (अतः) मनुष्योहोता स्तुतिमिथुनौ प्रभरते ॥ २ ॥

भाषार्थ ।

वीर (इन्द्र) जो भूखे हरिण की न्याईं अत्यन्त उद्योग करते हैं स्वयं प्रेरित की हुई हवियों से वीर (ऋत्विजों) द्वारा (अपने को) पूजते हैं, हे उद्यमी ! पूजनीय आप स्तुति के उत्सुक (हो, इसलिये) मनुष्य होता स्तुति के जोड़ों को अर्पण करता है ॥२॥

आशय यह है कि इन्द्र यज्ञ और स्तुति के अत्यन्त उत्सुक हैं और मनुष्य उन्हीं की प्रेरणा से हवि और स्तुति को अर्पण करते हैं, यदि वह यज्ञ और स्तुति से उदासीन हों तो कोई यज्ञ और स्तुति को न करे ॥

स्तुति के जोड़े अनुवाक्या और याज्या जो हवि देने से पूर्व पढ़े जाते हैं ॥

इन्द्रोदेवता, त्रिष्टुप्छन्दः ।११।११।११।६१।

नक्षद्धोतापरिसद्ममितायन् भरद्गर्भमाशरदःपृथिव्याः । क्रन्ददश्वोनयमानोरुवद्गौरन्तर्दूतोनरोदसीचरद्वाक् ॥ ३ ॥

ऋ०मं०१ सू०१७३मं०२ ([illegible])

नक्षत्	गच्छति	चलता है
होता	होता	होता
परि	परि+	–
सद्म	स्थानम्	स्थान को
मिता	मितम् (विभक्तेरात्वम्)	मापे हुए को
यन्	परि+यन्, परिगच्छन्	चारों ओर घूमता हुआ
भरत्	धारयति	धारण करता है
गर्भम्	गर्भम्	गर्भ को
आ	(मर्य्यादायाम)	तक
शरदः	शरदः	शरद से
पृथिव्याः	पृथिव्याम् (सप्तम्यर्थे षष्ठी)	पृथिवी में

क्रन्दत्	क्रन्दति	हिन हिनाता है
अश्वः	अश्वः	अश्व
नयमानः	नीयमानः	लेजाया जाता हुआ
रुवत्	रौति	डकारता है
गौः	वृषभः	बैल
अन्तः	मध्ये	बीच
दूतः	दूतः	दूत
न	इव	की न्याईं
रोदसी॰	द्यावापृथिव्योः	द्यौ और पृथिवी के
चरत्	विचरति	विचरती है
वाक्	वाक्	वाणी

संस्कृतार्थः ।

होतृरूप (सूर्यः) मितं स्थानं परिक्रमन् (सन्) गच्छति, (सः) शरदः प्राक् पृथिव्यां गर्भं धारयति, (तदा) अश्वः क्रन्दति, नीयमानः वृषभः (च) रौति, द्यावापृथिव्योर्मध्ये दूत इव वाग्विचरति ॥ ३ ॥

भाषार्थः ।

होतारूप (सूर्य) नापे हुए स्थान के चारों ओर घूमता हुआ चलता है, वह शरद से पहले पृथिवी में गर्भ को धारण करता है, (तब) घोड़ा हिनहिनाता है और लेजाया जाता हुआ बैल डकारता है (और) द्यौ और पृथिवी के बीच दूत की न्याईं वाणी विचरती है ॥ ३ ॥

वाणी से प्रयोजन स्तुति की वाणी का हो सकता है जिसको यज्ञ करने वाले हवि के साथ उच्चारण करते हैं वही देवता और मनुष्यों के बीच में दूत का काम करती हुई फिरती है ॥

इन्द्रो देवता,विराट्स्थानाछन्दः।२।११।२।११

ताकर्माऽषतराऽस्मै प्रच्यौत्नानिदेवयन्तोभरन्ते । जुजोषदिन्

(४७४१) ऋ०४।०१ य०।१७।४०७

न्द्रोदस्मवर्चा नासत्येवसुग्म्योरथेष्ठाः ॥ ४ ॥

ता	तानि	उन को
कर्म	कृतवन्तः स्मः (लुङिच्लेर्लुक्)	हमने किया है
अषऽतरा	रुचिरतराणि	अधिक रुचि के योग्यों को
अस्मै	अस्मै	इस के लिये
प्र	प्र+	–
च्यौत्नानि	उत्तेजकानि (आ०को०)	उत्तेजन करने वालों को
देवऽयन्तः	देवकामाः	देव भक्त
भरन्ते	प्र+भरन्ते, अर्पयन्ति	अर्पण करते हैं
जुजोषत्	स्वीकरोतु	स्वीकार करे

इन्द्रः	इन्द्रः	इन्द्र
दस्मऽवर्चाः	अद्भुततेजाः	अद्भुत तेज वाला
नासत्या ऽइव	असत्यरहितौ (अश्विनौ) इव	अश्विनों की न्याईं
सुग्म्यः	अनायासेन गन्ता	सहज से चलने वाला
रथेऽस्थाः	रथस्थायी	रथपर ठैरनेवाला

संस्कृतार्थः ।

(वयम्) अस्मै (इन्द्राय) तानि (हवींषि) रुचिरतराणि कृतवन्तःस्मः, देवकामाः उत्तेजकानि स्तोत्राणि अर्पयन्ति, अश्विनाविव अनायासेन गन्ता रथस्थायी (च) अद्भुततेजा इन्द्रः (एतानि) स्वीकरोतु ॥ ४ ॥

भावार्थः ।

हमने इस (इन्द्र) के लिये उन हवियों को अधिक रुचि के योग्य बनाया है, देवभक्त उत्तेजक

स्तोत्रों को अर्पण करते हैं,(वह) अश्विनों की न्याईं सहज से जाने वाले(और)रथ पर ठैरने वाले अद्भुत तेजस्वी इन्द्र (इन को) स्वीकार करें ॥ ४ ॥

इन्द्रोदेवता, निचृत्त्रिष्टुप्छन्दः।११।१०।११।११।

तमुष्टुहीन्द्रंयोहसत्वा यःशूरोमघवायोरथेष्ठाः। प्रतीचश्चिद्योधीयान्वृषण्वान् ववव्रुषश्चित्तमसोविहन्ता ॥ ५॥

तम्	तम्	उस को
ऊम्०	एव	ही
स्तुहि	स्तुहि	स्तुति कर
इन्द्रम्	इन्द्रम्	इन्द्र को

ऋ०सं०१८०१७२ मं०५ (४७६४)

यः	यः	जो
ह॒	खलु	सचमुच
सत्वा॑	सत्त्ववान्	बलवान्
यः	यः	जो
शूरः	शूरः	वीर
म॒घऽवा॑	धनवान्	धनवान्
यः	यः	जो
र॒थे॒ऽस्थाः	रथस्थायी	रथ पर ठैरने वाला
प्र॒ती॒चः	अभिमुखंप्राप्नुवतः	सामनेआएहुएसे
चि॒त्	अपि	भी
योधी॑यान्	योद्धृतमः	अधिक योद्धा

वृष॑ण्ऽवान्	नराश्वेनोपेतः	नर घोड़े से युक्त
व॒व्रु॒ष॑ः	आवरकस्य	ढकने वाले के
चि॒त्	अपि	भी
तम॑सः	अन्धकारस्य	अन्धकार के
वि॒ऽह॒न्ता	विनाशकः	नाश करने वाला

संस्कृतार्थः।

(हे आर्य्यगण ! त्वम्) तमिन्द्रमेव स्तुहि यः खलु सत्ववान् यः शूरो धनवान् रथस्थायी (चाऽस्ति) (यः) अभिमुखं प्राप्नुवतोऽपि योद्धृतमः, नराश्वोपेतः, आवरकस्यापि अन्धकारस्य विनाशकः (चाऽस्ति) ॥ ५ ॥

भाषार्थः।

(हे आर्य्यगण !) उस इन्द्र की ही स्तुति करो जो सचमुच बलवान् जो बीर धनवान् (और रथ पर ठैरने वाला है) (जो) सामने आए हुओं से भी अधिक योद्धा, नर घोड़े से युक्त, और ढकने वाले अन्धकार का भी नष्ट करने वाला है ॥५॥

ऋ०मं०१ सू०१७३ मं०६ (४७८६)

इन्द्रोदेवता,त्रिष्टुप्छन्दः ।११।११।११।११।

प्रयदित्थामहिनानृभ्यो अस्त्यरंरोदसीकक्ष्येनास्मै । संविव्यइन्द्रोवृजनंनभूमा भर्तिस्वधावाँओपशमिवद्याम् ॥ ६ ॥

प्र	अग्रे	आगे
यत्	यः (विभक्तेर्लुक्)	जो
इत्था	खलु	सचमुच
महिना	महत्त्वेन	महत्त्व से
नृभ्यः	मनुष्येभ्यः	मनुष्यों से
अस्ति	अस्ति	है

अर॑म्	पर्याप्तम्	पर्याप्त (म.दि.)
रोद॑सी०	द्यावापृथिव्यौ	द्यौ और पृथिवी
क॒क्ष्ये॒०	कटिबन्धने	कमरबन्द में
न	न	नहीं
अ॒स्मै॒	अस्मै	इस के लिये
सम्	सम्+	–
वि॒व्ये॒	सम+विव्ये, संवीतवान्	पहना है
इन्द्रः॑	इन्द्रः	इन्द्र ने
वृ॒जन॑म्	अलकम् (मा०को०)	जुल्फ़
न	इव	की न्याईं
भूम॑	भूमिम्	पृथिवी को

भर्ति	धारयति	धारण करता है
स्वधाऽवान्	स्वेच्छावान्	स्वतन्त्र
ओपशम्ऽइव	मुकुटमिव (आ०को०)	मुकुट की न्याईं
द्याम्	द्याम्	द्यौ को

संस्कृतार्थः ।

यः (इन्द्रः) महत्त्वेन मनुष्येभ्यः अग्रे अस्ति तस्मै द्यावापृथिव्यौ कटिबन्धनार्थं न पर्य्याप्ते (स्तः)स्वेच्छावान् इन्द्रो भूमिम् अलकमिव संवीतवान् द्याम् च) मुकुटमिव धारयति ॥ ६ ॥

भाषार्थ ।

जो (इन्द्र) महत्त्व के कारण मनुष्यों से आगे है उस के लिये द्यौ और पृथिवी कमरबन्द के लिये पर्याप्त नहीं (हैं) स्वतन्त्र इन्द्र ने पृथिवी को अलक की न्याईं पहना है,(और वह)द्यौ को मुकुट की न्याईं धारण करते हैं ॥ ६ ॥

इन्द्रोदेवता, निचृत्त्रिष्टुप्छन्दः।११।६।१।१०।११।

समत्सुत्वाशूरसतामुराणं प्रप-

थिंतमंपरितंसयध्यै। सजोषसइन्द्रं
मदेक्षोणीः सूरिंचिद्येअनुमदन्तिवाजैः ॥ ७ ॥

समत्ऽसु	सङ्ग्रामेषु (निघं०३।१)	युद्धों में
त्वा	त्वाम्	तुझ को
शूर	हे शूर !	हे वीर
सताम्	सताम्	सत्पुरुषों के
उराणम्	वरितारम्	वरने वाले को
प्रपथिन्ऽतमम्	अतिदीर्घयात्रिणम्	अत्यन्त लंबी यात्रा करने वाले को
परिऽतंसयध्यै	अलङ्कुर्वन्ति	सजाते हैं

सऽजोषसः	समानमनस्काः	समान मन वाले
इन्द्रम्	इन्द्रम्	इन्द्र को
मदे	मदाय	मद के लिये
क्षोणीः	पृथिव्यादिलोकाः	पृथिवी आदि लोक
सूरिम्	स्तोतारम् (निघं० ३।१६)	स्तुति करने वाले को
चित्	अपि	भी
ये	ये	जो
अनुऽमदन्ति	अनुमादयन्ति	आनन्दित करते हैं
वाजैः	अन्नैः	अन्नों से

संस्कृतार्थः ।

हे शूर ! समानमनस्काः पृथिव्यादिलोकाः सन्तो

वरितारं अतिदीर्घयायिणम् (च) त्वामिन्द्रं युद्धेषु मदाय अलङ्कुर्वन्ति ये (तव) स्तोतारमपि अन्नैरनुमादयन्ति ॥ ७ ॥

भाषार्थः ।

हे वीर ! पृथिवी आदि लोक एक चित्त वाले (होकर) सत्पुरुषों के वरने वाले (और) अत्यन्त लंबी यात्रा करने वाले आप इन्द्र को युद्धों में मद के लिये सजाते हैं जो आपके स्तोता को भी अन्नों से आनन्दित करते हैं ॥ ७ ॥

इन्द्रोदेवता, त्रिष्टुप्छन्दः।१११।१११।१११।

एवाहितेशंसवनासमुद्र आपो-
यत्तआसुमदन्तिदेवीः। विश्वातेअ-
नुजोष्याभूद्गौः सूरींश्चिद्यदिधि-
षावेषिजनान् ॥ ८ ॥

एव	एवम्	ऐसे

हि	एव	ही
ते॒	तव	तेरे
शम्	कल्याणकारिण्यः	कल्याण करने वालीं
सव॑ना	सोमाहुतयः	सोम की आहुतियां
स॒मु॒द्रे	अन्तरिक्षे (निघं० १।३)	अन्तरिक्ष में
आप॑ः	आपः	जल
यत्	यतः	जिस से
ते॒	तव	तेरी
आ॒सु	आसु	इन में
मद॑न्ति	माद्यन्ति	मोद करती हैं
दे॒वीः	देव्यः (पूर्वसवर्णदीर्घः)	देवियाँ

(४७७२) ऋ०८।०१ सू०१७१ मं०८

विश्वा॑	सर्वा	सारी
ते॒	तुभ्यम्	तेरे लिये
अनु॑	अनु+	–
जोष्या॑	अनु+जोष्या,आनुकूल्येनसेविनी	अनकूलता से सेवा करने वाली
भू॒त्	भवति	होजाती है
गौः	वाक् (निघं० १।११)	वाणी
सू॒रीन्	स्तोतॄन् (निघं० ३।१६)	स्तोताओं को
चि॒त्	(पूरणः)	–
यदि॑	यदा	जब
धि॒षा	स्तुत्या	स्तुति से
वेषि॑	कामयसे	तू कामना करता है

ज॑नान्	मनुष्यान्	मनुष्यों को

संस्कृतार्थः ।

(हे इन्द्र !) एवमेव अन्तरिक्षे तव सोमाहुतयः कल्याणकारिण्यः (सन्ति) यतो देव्यआपः आसु तव (प्रजासु) माद्यन्ति, सर्वा वाणी तुभ्यमानुकूल्येन सेविनी भवति यदा (त्वम्) स्तोतॄन् मनुष्यान् स्तुत्या कामयसे ॥ ८ ॥

भाषार्थः ।

(हे इन्द्र !) ऐसे ही अन्तरिक्ष में आप के सोम की आहुतियाँ कल्याण करने वाली (हैं) जिस से जल देवियाँ इन (आपकी) (प्रजाओं) में मोद करती हैं, सारी वाणी आप के लिये अनुकूलता से सेवा करने वाली हो जाती है जब आप स्तोता मनुष्यों को स्तुति से कामना करते हो ॥ ८ ॥

अन्तरिक्षमें देवता इन्द्र को मानो सोम को आहुतियाँ देते हैं जिस के फल से वर्षा का जल गिरता है ॥

इन्द्रोदेवता,निचृत्त्रिष्टुप्छन्दः।।११।१०।१३।३१।

असा॑म॒यथा॑सुष॒खायएन स्वभि॒ष्ट॑योन॒रांनशंसैः॑। अस॒द्यथा॑न॒इन्द्रो॑

वन्दनेष्ठास्तुरोनकर्मनयमानउक्था ॥ ८ ॥

असाम	भवेम	हम हों
यथा	यथा	जिस प्रकार
सुऽसखायः	शोभनमित्रोपेताः	अच्छे मित्र वाले
एन	हे स्वामिन् !	हे स्वामी
सुऽअभिष्टयः	सुरक्षकयुक्ताः (आ०को०)	अच्छे रक्षक से युक्त
नराम्	नराणाम्	मनुष्यों की
न	इव	मानो
शंसैः	स्तुतिभिः	स्तुतियों से

ऋ०मं०१ सू०१७३ मं०९ (४७७६)

असत्	भवेत्	हो
यथा	यथा	जिस प्रकार
नः	अस्मभ्यम्	हमारे लिये
इन्द्रः	इन्द्रः	इन्द्र
वन्दनेऽस्थाः	स्तुतिस्थायी	स्तुति पर ठैरने वाला
तुरः	त्वरमाणः	शीघ्रकारी
न	इव	की न्याईं
कर्म	कर्म	कर्म को
नयमानः	प्रापयन्	प्राप्त कराता हुआ
उक्था	स्तुत्या	स्तुति से

संस्कृतार्थः।

हे स्वामिन् ! (तथा कुरु) यथा (वयम्) नराणां

स्तुतिभिरिव शोभनमित्रोपेताः शोभनरक्षकोपेताः(च) भवेम, यथा (च) इन्द्रः अस्मभ्यं स्तुतिस्थायी त्वरमाण इव स्तुत्या कर्म प्रापयन् (च) भवेत् ॥ ९ ॥

भाषार्थ ।

हे स्वामी ! (ऐसा करो) जिस प्रकार हम मनुष्यों की स्तुतियों से मानो अच्छे मित्र (और) सुरक्षक से युक्त हों, जिस प्रकार इन्द्र हमारे लिये स्तुति पर ठैरने वाले (और शीघ्रकारी की न्याइँ स्तुति से कर्म को प्राप्त कराने वाले हों ।९।

अच्छा मित्र और अच्छ रक्षका यहां इन्द्र है जिस को हम स्तुति द्वारा प्राप्त कर सकते हैं ॥

इन्द्रोदेवताः, त्रिराड्त्रिष्टुप्छन्दः ।९।११।११।११।

विष्पर्धसोनरांनशंसैरस्माकासदिन्द्रोवज्रहस्तः । मित्रायुवोनपूर्पतिंसुशिष्टौ मध्यायुवउपशिक्षन्तियज्ञैः ॥ १० ॥

विऽस्प॑र्धसः	स्पर्धारहिताः	स्पर्धा से रहित
न॒राम्	नराणाम्	मनुष्यों की
न	इव	मानो
शंसै॑ः	स्तुतिभिः	स्तुतियों से
अ॒स्माक॑	अस्माकम्	हमारा
अ॒स॒त्	भवेत्	हो
इन्द्र॑ः	इन्द्रः	इन्द्र
वज्र॑ऽहस्तः	वज्रधारी	वज्रधारी
मि॒त्र॒ऽयुव॑ः	मित्रकामाः	मित्रों की कामना वाले
न	इव	जैसे
पःऽप॑तिम्	पुरस्वामिनम्	नगर के स्वामी को

सुऽशिष्टौ	सुशासने	सुन्दर शासन में
मध्यऽयुवः	मध्येऽवस्थितिं कामयमानाः	मध्य में स्थिति की कामना वाले
उप	उप+	-
शिक्षन्ति	उप+शिक्षन्ति, उपेत्य ददति	देते हैं
यज्ञैः	यज्ञैः	यज्ञों के द्वारा

संस्कृतार्थः ।

नराणां स्तुतिभिः स्पर्धारहिताः (मनुष्याः) इव वज्रधारी इन्द्रोऽस्माकं भवेत्, (पुर-)मध्येऽवस्थितिं कामयमानाः यथा सुशासने (निमित्तभूते) पुरपतिम् (उपेत्य ददति) तथा मित्रकामाः यज्ञैः (इन्द्रम्) उपेत्य ददति ॥ १० ॥

भाषार्थः ।

मनुष्यों की स्तुतियों से जैसे मनुष्य स्पर्धा से रहित (हो जाते हैं) वैसे वज्रधारी इन्द्र हमारे हों, जैसे (पुर के) बीच रहने की इच्छा वाले सुशासन के (निमित्त) नगर के स्वामी को (देते हैं) वैसे मित्रों की कामना वाले यज्ञों द्वारा (इन्द्र को) देते हैं ।१०।

पहिले पाद का यह आशय है कि इन्द्र को अपना बनाने के लिये बहुत से मनुष्य हम से स्पर्धा करते हैं, परन्तु जैसे स्तुति करने से मनुष्य स्तुति करने वाले के पक्षपाती बन जाते हैं वैसे इन्द्र स्पर्धा रहित होकर केवल हमारे बन जावें ॥

इन्द्रो देवता। निचृत्त्रिष्टुप्छन्दः ।१०।११।११।११।

य॒ज्ञोहिष्मेन्द्रं॒कश्चि॑दृ॒न्धन् जु॑हुरा॒णश्चि॒न्मन॑सापरि॒यन्। ती॒र्थेनाच्छा॑ता॒तृ॒षा॒णमोको॑ दी॒र्घोनसि॒ध्रमाकृ॑णो॒त्यध्वा॑ ॥ ११ ॥

य॒ज्ञः	यज्ञेन (विभक्तेःसुः)	यज्ञ से
हि	खलु	सचमुच
स्म॒	(पूरणः)	—
इ॑न्द्रम्	इन्द्रम्	इन्द्र को

कः	कः+	–
चि॒त्	कः+चित्	कोई
ऋ॒न्धन्	परिचरन् (निघं०३।४)	सेवा करता हुआ
जु॒हु॒रा॒णः	कुटिलः	कुटिल
चि॒त्	तु	परन्तु
मन॑सा	मनसा	मन से
प॒रि॒ऽयन्	परिगच्छन्	फिरता हुआ
ती॒र्थे	मार्गे	मार्ग पर
न	इव	जैसे
अच्छ॑	प्रति	की ओर
त॒तृषा॒णम्	पिपासायुक्तम्	प्यासे को

ओ॑कः	स्थानम्	स्थान को
दी॒र्घः	दीर्घः	लंबा
न	न	नहीं
सि॒ध्रम्	सिद्धिप्रदम्	सिद्धि देने वाले को
आ	आ +	-
कृ॒णो॒ति॒	आ+कृणोति, समीपमानयति (आ०को०)	समीप लाता है
अध्वा॑	मार्गः	मार्ग

संस्कृतार्थः ।

कश्चिद्यज्ञोखलु इन्द्रं परिचरन् मनसातुकुटिलः (भूत्वा) परिगच्छन् (विद्यते) यथा दीर्घोमार्गः पिपासायुक्तं मार्गे सिद्धिप्रदं स्थानं प्रति नानयति (तथा यज्ञस्तं कुटिलम्, फलं प्रति नानयति) ॥ ११ ॥

भावार्थः ।

कोई यज्ञ से सचमुच इन्द्र की सेवा करता हुआ

परन्तु मनसे कुटिल हुआ फिरता (है) जैसे लंबा मार्ग प्यासे को मार्ग में सिद्धि देने वाले स्थान की ओर नहीं लाता (ऐसे ही यज्ञ उस कुटिल को फल की ओर नहीं लाता) ॥ ११ ॥

इन्द्रोदेवता, निचृत्त्रिष्टुप्छन्दः।१।१।१०।११।११।

मोषूणइन्द्राऽत्रपृत्सुदेवैरस्ति
हिष्मातेशुष्मिन्नवयाः। महश्चिद्य-
स्यमीळ्हुषोयव्या हविष्मतोमरु-
तोवन्दतेगीः ॥ १२ ॥

मो०	मा (उ इति पूरणः)	मत
सु	(पूरणः)	–
नः	अस्मान्	हम को
इन्द्र	हे इन्द्र !	हे इन्द्र

ऋ०४अ०१६सू०१७मं०१२ (७७८७)

अत्र	अत्र	यहां
पृत्सु	सङ्ग्रामेषु (निघं० २।१७)	युद्ध में
देवैः	देवैः	देवताओं के साथ
अस्ति	अस्ति	है
हि	खलु	सचमुच
स्म	पूरणः)	–
ते	तुभ्यम्	तेरे लिये
शुष्मिन्	हे बलवन् !	हे बलवान्
अवयाः	अवयुज्यपृथक्कृतः(हविर्भागः)	हवि का भाग
महः	महतः	महान् के
चित्	(पूरणः)	–

यस्य॑	यस्य	जिस के
मी॒ळ्हुषः॑	वीर्यवतः	वीर्यवान के
य॒ठ्या	यठ्यान्, कामयमानान्	चाहने वालों को
ह॒विष्म॑तः	हविर्युक्तस्य	हवि से युक्त की
म॒रु॑तः	मरुतः	मरुतों को
वन्द॑ते	पूजयति	पूजती है
गीः	वाणी	वाणी

संस्कृतार्थः।

हे बलवन् ! इन्द्र ! (त्वम्) अत्र सङ्ग्रामेषु अस्मान् मा (त्यज, यतः) देवैः सह तुभ्यम् (अपि हविर्भागोऽस्ति खलु, महतो वीर्यवतो यस्य (तव) इच्छुकान् मरुतो हविर्युक्तस्य (मम) वाणी पूजयति ॥ १२ ॥

भाषार्थः।

हे बलवान् इन्द्र ! (आप) यहां युद्धों में हमें न (त्यागें क्योंकि) देवताओं के साथ आपके

लिये (भी) सचमच हवि का भाग है, महान वीर्यवान जिस (आप) के चाहने वाले मरुतों को (मुझ हविदेने वाले की वाणी पूजती है ॥ १२ ॥

इन्द्रोदेवता, त्रिष्टुप्छन्दः ।११।११।११

एषस्तोमइन्द्रतुभ्यमस्मे एतेनगातुंहरिवोविदोनः। आनोववृत्याः सुवितायदेव विद्यामेषंवृजनंजीरदानुम् ॥ १३ ॥

एषः	एषः	यह
स्तोमः	स्तोमः	स्तोत्र
इन्द्र	हे इन्द्र !	हे इन्द्र
तुभ्यम्	तुभ्यम्	तेरे लिये

(७७८७) ऋ०मं०१सू०१७३मं०१३

अ॒स्मे०	अस्माकम्	हमारा
ए॒ते॑न	एतेन	इस से
गा॒तुम्	मार्गम्	मार्ग को
ह॒रि॒ऽवः॒	हे अश्वयुक्त !	हे घोड़ों से युक्त
वि॒दः॒	लभस्व	प्राप्त करो
नः॒	अस्मभ्यम्	हमारे लिये
आ	आ+	-
नः॒	अस्मान्	हम को
व॒वृ॒त्याः॒	आ+ववृत्याः, आवर्तस्व	फिरो
सु॒वि॒ताय॑	कल्याणाय	कल्याण के लिये
दे॒व॒	हे देव !	हे देव

विद्याम	प्राप्नुयाम	हम प्राप्त करें
इषम्	अन्नम्	अन्न को
वृजनम्	बलम्	बल को
जीरदानुम्	शीघ्रदानशील- ताम्	शीघ्र दान देने के स्वभाव को

संस्कृतार्थः ।

हे देव ! अश्वयुक्त ! इन्द्र ! एषोऽस्माकंस्तोमस्तुभ्यम् (अर्पित) एतेनाऽस्मभ्यं मार्गलभस्व कल्याणाय अस्मान् (प्रति) आवर्तस्व, (वयम्) अन्नंबलं शीघ्रदानशीलताम् (च) प्राप्नुयाम ॥ १३ ॥

भाषार्थः ।

हे देव ! हे घोड़ों से युक्त ! इन्द्र ! यह हमारा स्तोत्र आपके लिये (है) इससे हमारे लिये मार्ग को प्राप्त करो, कल्याण के लिये हमारी (ओर) फिरो, हम अन्न बल (और) शीघ्र दान देने के स्वभाव को प्राप्त करें ॥ १३ ॥

मार्ग को प्राप्त करने से यह प्रयोजन है कि हमें कल्याण का रस्ता बताओ अर्थात् हमें कल्याण की ओर प्रेरण करो ।

इति त्रिसप्तत्यधिकशततमं सूक्तम् ।

ऋ०मं०१ सू०१७४।

इन्द्रोदेवता, अगस्त्यऋषिः

विनियोगः–

१-१०। एतत्सूक्तं पृष्ठ्ये षडहे स्तोमवृद्धौ स्तोमातिशंसनार्थं होत्रकैः शंस्तव्यम् (आ०७।१२।२।)

सूक्त का भावार्थ।

हे इन्द्र! आप और जो देवता हैं वे हमारे राजा हैं, हे प्राणवान! आप हमारे वीरों की और हमारी रक्षा करें, आप सत्पुरुषों के पालक धनवान और हमारे तारने वाले हैं, आप सच्चे धन के देने वाले और बल के देने वाले हैं ॥१॥ हे इन्द्र! आप ने निरादर के वचन बोलने वाली दस्युजाति को दीन किया है, जब शरद ऋतु में शरण देने वाले उन के सात गढ़ों को आप ने छिन्न भिन्न किया, हे निर्दोष! आप ने सदा चलने वाले जलों को बहाया और युवा पुरुकुत्स के लिये शत्रु को अधीन किया ॥ २ ॥ हे बहुतों से बुलाए जाने वाले इन्द्र! आप रण में शूरवीरों से रक्षित सेनाओं के नेता बनो और सभ्यता के प्रकाश को प्रेरण करो जो उनके द्वारा फैलता है, आप हमारे घरों में निरन्तर रहने वाली अग्निहोत्र की अग्नि की रक्षा करो जिससे हमारे दर्शपूर्णमास आदि कर्म स्थायी रहें ॥ ३ ॥ हे इन्द्र! आप के यश बढ़ाने के लिए शत्रु आपके वज्र के महत्त्व से मारे जाकर अपने स्थान में सोए, जब आपने युद्ध से जलों को और गौओं को छुड़ाया और घोड़ों पर चढ़ कर साहस से शत्रु के धनों को निःशेष किया ॥ ४ ॥ हे इन्द्र! कुत्स के अगवैया बनो जिस को आप प्यार करते हो, वायु के घोड़े आप को सुखदायी और शीघ्र लाने वाले हों, सूर्य अपने पहिये को समीप लावें और वज्रधारी आप शत्रुओं के सामने जावें

ऋग्वेद् सू०१७४ मं०१ (७४१०)

॥ ५ ॥ हे घोड़ों वाले इन्द्र ! भक्त की प्रेरणा से बढ़े हुए आपने अपने मित्रों के सताने वाले दानहीन दस्युओं को मारा है, जिन्हों ने आप को मनुष्य के साथ रहने वाला मित्र अनुभव कर लिया है उनका वंश इस पृथिवी में सन्तान द्वारा चिरस्थायी बन गया है ॥ ६ ॥ हे इन्द्र ! हृदय में स्तोत्र की प्राप्ति होने पर ऋषि ने आप की स्तुति की है, आप ने दस्यु को पृथिवी पर सुलाया, धनवान इन्द्र ने अग्नि वायु और सूर्य इन तीन विचित्र दानियों को उत्पन्न किया और आर्यों पर अत्याचार करने वाले कुयवाच को मार कर घर में सुलाया ॥ ७ ॥ हे इन्द्र ! आप के सनातन आकाश संबन्धि पराक्रम को सम्प्रदाय के नैरन्तर्य के लिए नए ऋषियों ने प्राप्त करके गाया है, आप ने गढ़ों को तोड़ते हुए की न्याईं नास्तिक जाति को छिन्न भिन्न किया है और देवशून्य निन्दक के शस्त्र को नीचे गिराया है ॥ ८ ॥ हे इन्द्र ! शत्रुओं को कंपाने वाले आप ने घरघराते हुए जलों को बहती हुई नदियों की न्याईं बहाया है, हे शूरवीर ! जब आप ने समुद्र की लांघा तब तुर्वश और यदु को पार लंघाया ॥ ९ ॥ हे इन्द्र ! आप सदा हमारे हो, आप मनुष्य की पीड़ा से अत्यन्त निवृत्त हुए २ उनके रक्षक हो, आप युद्ध के लिए सामने आने वालों से हम को मिलाने वाले हो, हम अन्न को बल को और शीघ्र दान देने के स्वभाव को प्राप्त करें ॥ १० ॥

इन्द्रोदेवता, निचृत्त्रिष्टुप्छन्दः ।११।१०।११।३१।

त्वंराजेन्द्रयेचदेवारक्षानॄन्पाह्य-
सुरत्वमस्मान् । त्वंसत्पतिर्मघ-

वा॑न॒स्तरु॑त्र॒स्त्वंस॒त्योवस॑वानःस-
हो॒दाः ॥ १ ॥

त्वम्	त्वम्	तू
राजा॑	राजा	राजा
इ॒न्द्र॒	हे इन्द्र !	हे इन्द्र !
ये	ये	जो
च॒	च	और
दे॒वाः	देवाः	देवता
रक्षा॑	रक्ष	रक्षा करो
नॄन्	नरान्	नरों को
पा॒हि	पाहि	पालो

ऋ०मं०१ सू०१७४ मं०१ (४७१२)

अ॒सु॒र॒	हे प्राणवन्!	हे प्राणवान्!
त्वम्	त्वम्	तू
अ॒स्मान्	अस्मान्	हम को
त्वम्	त्वम्	तू
सत्ऽप॑तिः	सतां पालकः	सत्पुरुषोंकापालक
म॒घऽवा॑	धनवान्	धनवान्
न॒ः	अस्माकम्	हमारा
तरु॑त्रः	तारयिता	तारने वाला
त्वम्	त्वम्	तू
स॒त्यः	सत्यः	सच्चा
वस॑वानः	धनस्य दाता	धन के देने वाला
स॒ह॒ःऽदाः	बलप्रदः	बल के देने वाला

संस्कृतार्थः।

हे प्राणवन् ! इन्द्र ! त्वम् (अस्माकम्) राजा-(असि) येच देवाः (तेऽपिराजानःसन्ति) (सः) त्वमस्मान् पाहि, नरान् (च) रक्ष, त्वं सतांपालको धनवान् अस्माकंतारकः (चाऽसि) त्वं सत्यः धनस्य दाता बलप्रदः (चाऽसि) ॥ १ ॥

भावार्थः।

हे प्राणवान इन्द्र ! आप (हमारे) राजा (हो) और जो देवता हैं (वे भी राजा हैं) (वह) आप हम को पालें (और) नरों की रक्षा करें, आप सत्पुरुषों के पालक धनवान् (और) हमारे तारने वाले (हैं) आप सच्चे धन के देने वाले (और) बल के देने वाले (हैं) ॥ १ ॥

इन्द्रोदेवता, निचृत्त्रिष्टुप्छन्दः ।१०।११।११।११

द॒नोविश॑इन्द्रमृ॒ध्रवा॑चः स॒प्तय-
त्पु॒रः॒शर्म॒शार॑दी॒र्द॑र्त्। ऋ॒णोर॒पो
अ॑नव॒द्यार्णा॒ यूने॑वृ॒त्रंपु॑रु॒कुत्सा॑यर-
न्धीः॥ २ ॥

म०८०१ सू०१७४ मं०२ (५७१५)

दन॑ः	दीना अकरोः	तूने दीन किया
विश॑ः	प्रजाः	प्रजाओं को
इ॒न्द्र॒	हे इन्द्र !	हे इन्द्र
मृ॒ध्रऽवा॑चः	अवमानवचनाः	निरादर के वचन वालियों को
स॒प्त	सप्त	सात को
यत्	यदा	जब
पुर॑ः	पुराणि	गढ़ों का
शर्म॑	शरणयानि	शरण देने वालों को
शा॑रदीः	शरत्सम्बन्धीनि	शरद् से सम्बन्ध रखने वालों को
दर्त्॑	विदारितवानसि (पुरुषव्यत्ययः)	तूने छिन्न भिन्न किया है
ऋ॒णोः	अगमयः	तूने चलाया

अपः	अपः	जलों को
अनवद्य	हे निर्दोष !	हे निर्दोष
अर्णाः	सदा गमनशीलाः	सदा चलने वालों को
यूने	यूने	जवान के लिए
वृत्रम्	शत्रुम्	शत्रु को
पुरुऽकुत्साय	पुरुकुत्साय	पुरुकुत्स के लिए
रन्धीः	अधीनं कृतवानसि	तूने अधीन किया

संस्कृतार्थः ।

हे निर्दोष ! इन्द्र ! (त्वम्) अवमानवचनाः प्रजाः दीनाअकरोः यदा (तेषाम्) शरदतो शरण्यानि सन्त पुराणि विदारितवानसि (त्वम्) सदा गमनशीला अपः प्रवाहितवानसि यूने पुरुकुत्साय (च) शत्रुं वशीकृतवानसि ॥ २ ॥

भाषार्थ ।

हे निर्दोष इन्द्र ! आपने निरादर वचन वाली

प्रजाओं को दीन किया जब (उनके) शरद्‌तु में शरण देने वाले सात गढ़ों को छिन्न भिन्न किया (आपने) सदा चलने वाले जलों को बहाया (और) जवान पुरुकुत्स के लिये शत्रु को अधीन किया ॥२॥

निरादर के वचन बोलने वाली प्रजा दस्युजाति है जिस के गढ़ों को इन्द्र की सहायता से आर्य्यों ने तोड़ा ।

इन्द्रोदेवता, त्रिष्टुप्छन्दः ।१०।११।११।१०

अजावृतइन्द्रशूरपत्नीर्द्यांचये-
भिःपुरुहूतनूनम् । रक्षोअग्निम-
शुषंतूर्वयाणं सिंहोनदमेअपांसिव-
स्तोः ॥ ३ ॥

अज	प्रेरय	प्रेरण करो
वृतः	सेनाः (ऋ०४।१७।९)	सेनाओं को
इन्द्र	हे इन्द्र !	हे इन्द्र

शूरऽपत्नीः	शूरैः पालिताः	वीरों से रक्षा की हुइयों को
द्याम्	प्रकाशम् (भो०को०)	प्रकाश को
च	(पूरणः)	और
येभिः	यैः	जिन से
पुरुऽहूत	हे बहुभिराहूत !	हे बहुतों से बुलाए गए
नूनम्	खलु	सचमुच
रक्षो०	रक्ष	तू रक्षा कर
अग्निम्	अग्निम्	आग को
अशुषम्	उपशमरहितम्	न बुझने वाले को
तूर्वयाणम्	स्पन्दमानम्	गति से युक्त को
सिंहः	सिंहः	सिंह

न	इव	की न्याईं
दमे॑	गृहे	घर में
अपां॑सि	कर्माणि	कर्मों को
वस्तो॑ः	वासयितुम्, स्थायीकर्तुम्	स्थायी बनाने के लिए

संस्कृतार्थः ।

हे बहुभिराहूत! इन्द्र! (त्वम्) शूरैः पालिताः सेनाः प्रेरय, यैः खलु प्रकाशम् वर्धयसि सिंह इव (चास्मत्) गृहे (वर्तमानम्) उपशमरहितं स्पन्दमानमग्निम् (च) कर्माणिस्थायीकर्तुं रक्ष ॥ ३ ॥

भावार्थः ।

हे बहुतों से बुलाए गए इन्द्र! आप वीरों से रक्षा की हुई सेनाओं को प्रेरण करो जिन से प्रकाश को (बढ़ाते हो) (और) सिंह के समान (हमारे) घर में (वर्तमान) न बुझने वाले और गति से युक्त अग्नि को कर्मों की स्थति के लिये रक्षा करो ॥ ३ ॥

तात्पर्य के लिये सूक्त के भावार्थ को देखो।

(४७११) ऋ०मं० सू०१०४ मं०४

इन्द्रोदेवता, निचृत्त्रिष्टुप्छन्दः।१०।११।११।११

शेषन्नुतइन्द्रसस्मिन्योनौ प्रशस्तयेपवीरवस्यमह्ना । सृजदर्णांस्यवयद्युधागास्तिष्ठद्धरीधृषतामृष्टवाजान् ॥ ४ ॥

शेषन्	अशेरत	सोए
नु	खलु	सचमुच
ते	तव	तेरी
इन्द्र	हे इन्द्र !	हे इन्द्र !
सस्मिन्	स्वस्मिन्	अपने में
योनौ	स्थाने	स्थान में
प्रऽशस्तये	प्रशंसायै	प्रशंसा के लिए

ऋ०मं०१ सू०१७४ मं०४ (४८००)

पवीरवस्य	वज्रस्य	वज्र के
मह्ना	महत्त्वेन	महत्त्व से
सृजत्	अव + सृजत्, अवासृजः (पुरुषव्यत्ययः)	तू ने छोड़ा है
अर्णांसि	उदकानि	जलों को
अव	+अव	–
यत्	यदा	जब
युधा	युद्धेन	युद्ध से
गाः	गाः	गौओं को
तिष्ठत्	आरूढवानसि (पुरुषव्यत्ययः)	तू चढ़ा है
हरी०	अश्वौ	घोड़ों को
धृषता	धृष्टतया	साहस से
मृष्ट	निःशेषीकृतवान्	निःशेष किया

वाजान्	धनानि (आ०को०)	धनों को

संस्कृतार्थः ।

हे इन्द्र! तव प्रशंसायै वज्रस्य महत्त्वेन ते (शत्रवः) स्वस्मिन् स्थाने खलु भृत्वा)अशेरत यदा(त्वम्)युद्धेन उदकानि गाः(च) अवसृष्टवान्, अश्वौ आरूढवान्, धृष्टतया(शत्रु)धनानि (च) निःशेषीकृतवान् ॥ ४ ॥

भाषार्थः ।

हे इन्द्र! आपको प्रशंसा के लिये वज्र के महत्त्व से वे(शत्रु) सचमुच अपने स्थान में (मरकर) सोए, जब आपने युद्ध से जलों को (और) गौओं को छोड़ा, घोड़ों पर चढ़े (और) साहस से (शत्रु के) धनों को निःशेष किया ॥ ४ ॥

इन्द्रोदेवता, निचृत्त्रिष्टुप्छन्दः ।१०।११।११।११

वहकुत्समिन्द्रयस्मिञ्चाक-
न्त्स्यूमन्यूऋज्रावातस्याश्वा। प्रसू-
रश्चक्रंवृहतादभीकेऽभिस्पृधोया-
सिषद्वज्रबाहुः ॥ ५ ॥

ऋ०मं०१सू०१७४मं०५ (४८०२)

वह॑	प्रणय	अगवैया बनो
कुत्स॑म्	कुत्सम्	कुत्स को
इ॒न्द्र॒	हे इन्द्र !	हे इन्द्र
यस्मि॑न्	यम् (द्वितीयार्थे सप्तमी)	जिस में
चा॒कन्	कामयसे (निघं० ४।३)	तू प्रेम करता है
स्यू॒म॒न्यू॰	सुखप्रदौ (स्यूमकमितिसुखनाम, निघं० ३।६)	सुख देने वाले
ऋ॒ज्रा	शीघ्रगामिनौ	शीघ्र चलने वाले
वात॑स्य	वायोः	वायु के
अश्वा॑	अश्वौ	घोड़े
प्र	प्र +	–
सूर॑ः	सूर्यः	सूर्य
च॒क्रम्	चक्रम्	पहिये को

वृ॒ह॒ता॒त्	आनयतु	लावे
अ॒भीके॑	समीपे (आ०को०)	समीप
अ॒भि	सम्मुखम्	सामने
स्पृधः॑	शत्रून्	शत्रुओं को
या॒सि॒ष॒त्	गच्छतु	जावे
वज्र॑ऽबाहुः	वज्रस्य धारकः	वज्र के पकड़ने वाला

संस्कृतार्थः।

हे इन्द्र ! कुत्सं प्रणय यं कामयसे, वातस्य अश्वौ सुखप्रदौशीघ्रगामिनौ (च भवताम्) सूर्यः चक्रं समीपमानयतु, वज्रस्य धारकः (च) शत्रून्अभिगच्छतु ॥ ५॥

भाषार्थः।

हे इन्द्र ! कुत्स के अगवैया बनो जिससे आप प्रेम करते हो, वायु के घोड़े सुख के देने वाले (और) शीघ्रगामी (हों) सूर्य पहिये को समीप लावें, (और) वज्रधारी शत्रुओं के सामने जावें ॥ ५ ॥

इस मंत्र में ऋषि पर्व वृत्तान्त को साक्षात कर रहे हैं।

इन्द्रोदेवता, निचृत् त्रिष्टुप्छन्दः।१०।११।११.११।

जघन्वाँइन्द्रमित्रेरूञ्चोदप्रवृद्धोहरिवोअदाशून्। प्रयेपश्यन्नर्यमणांसचायोस्त्वयाशूर्तावहमानाअपत्यम्॥ ६ ॥

जघन्वान्	हतवानसि	तूने नाश किया है
इन्द्र	हे इन्द्र !	हे इन्द्र
मित्रेरून्	मित्राणामुद्वेजकान्	मित्रों के सताने वालों को
चोदऽप्रवृद्धः	प्रेरणैःप्रवृद्धः	प्रेरणाओं से बढ़ा हुआ
हरिऽवः	हे अश्वोपेत !	हे घोड़ों वाले
अदाशून्	अदातॄन्	न देने वालों को
प्र	प्र +	–

ये	ये	जिन्हों को
पश्य॑न्	प्र + पश्यन् , दृष्टवन्तः	देखा
अ॒र्य॒मण॑म्	मित्रम् (आ०को०)	मित्र को
सचा॑	सह	साथ
आ॒योः	मनुष्यस्य	मनुष्य के
त्वया॑	त्वया	तुझ से
शू॒र्ताः	दृढीकृताः (आ०को०)	दृढ़ किए गए
व॑हमानाः	धारयन्तः	धारण करते हुए
अप॑त्यम्	सन्ततिम्	सन्तान को

संस्कृतार्थः ।

हे अश्वोपेत ! इन्द्र ! प्रेरणैः प्रवृद्धः (त्वम्) मित्राणामुद्वेजकान् अदातृन् हतवानसि, ये (त्वाम्) मनुष्यस्य सहायकं मित्रमपश्यन् (ते) सन्ततिम् धारयन्तः (सन्तः) त्वया दृढीकृताः (अभवन्) ॥६॥

भाषार्थ ।

हे घोड़ों वाले इन्द्र ! प्रेरणाओं से बढ़े हुए आपने मित्रों के सताने वाले दानहीनों को मारा है, जिन्होंने (तुझ को) मनुष्य के साथ रहने वाला मित्र देखा है वे सन्तान को धारण करते हुए तुझ से स्थिर किये गए हैं ॥ ६ ॥

इन्द्रोदेवता, त्रिष्टुप्छन्दः।१०।१०।११।११।

रपत्कविरिन्द्रार्कसातौ क्षांदा-
सायापबर्हणीं कः । करत्तिस्रोम-
घवादानुचित्रा निदुर्योणेकुयवाचंमृ-
धिश्रेत् ॥ ७ ॥

रपत्	आलपितवान्	आलाप किया
कविः	ऋषिः	ऋषि ने
इन्द्र	हे इन्द्र !	हे इन्द्र !

अ॒र्कऽसा॑तौ	स्तोत्रस्य लाभे (सति)	स्तोत्र की प्राप्ति (होने) पर
क्षाम्	पृथिवीम्	पृथिवी को
दा॒साय॑	दस्यवे	दस्यु के लिए
उ॒प॒ऽब॒र्हणी॑म्	शय्याम्	शय्या को
कः०	कृतवानसि	तू ने किया है
क॑रत्	कृतवान्	किया है
ति॒स्रः	त्रीन्	तीनों को
म॒घऽवा॑	धनवान्	धनवान् ने
दा॑नुऽचित्राः	विचित्रदानिनः	विचित्र दानियों को
नि	नि +	–

दु॒र्यो॒णे	गृहे	घर में
कुय॑वाचम्	कुयवाचम्	कुयवाच को
मृ॒धि	सङ्ग्रामे (सति)	युद्ध (होने) पर
श्रे॒त्	नि + श्रेत्, निश्रायितवान्, स्वापितवानित्यर्थः	सुलाया

संस्कृतार्थः ।

हे इन्द्र ! स्तोत्रस्यलाभे (सति) ऋषिः आलपितवान्, (त्वम्) दस्यवे पृथिवीं शय्यां कृतवानसि, धनवान् (इन्द्रः) त्रीन् विचित्रदानिनः कृतवान्, सङ्ग्रामे (च सति) कुयवाचं (हत्वा) गृहे स्वापितवान् ॥ ७ ॥

भाषार्थ ।

हे इन्द्र ! स्तोत्र की प्राप्ति होने पर ऋषि ने आलाप किया, आपने दस्यु के लिये पृथिवी को शय्या बनाया, धनवान् (इन्द्र) ने तीन विचित्र दानियों को उत्पन्न किया (और) युद्ध होने पर कुयवाच को (मार कर) घर में सुलाया ॥ ७ ॥

तीन विचित्र दानी, अग्नि, वायु और सूर्य होसकते हैं। कुयवाच किसी उपद्रव करने वाले दस्यु का नाम है।

(४८०९) ऋ०मं०१ सू०१७४ मं०८

इन्द्रोदेवता, निचृत्त्रिष्टुप्छन्दः।११।११।१०।११

सनातातइन्द्रनव्याआगुः सहोनभोऽविरणायपूर्वीः । भिनत्पुरो नभिदोऽरदेवीर्ननमोवधरदेवस्यपीयोः ॥ ८ ॥

सना	सनातनम्	सनातन को
ता	तम्	उस को
ते	तव	तेरे
इन्द्र	हे इन्द्र !	हे इन्द्र
नव्याः	नव्याः	नवीनों ने
आ	आ +	–
अगुः	आ+अगुः, प्राप्तवन्तः	पाया है
सहः	पराक्रमम्	पराक्रम को

नभ॑ः	आकाश-(सम्बन्धि)	आकाश(सम्बन्धी) को
अवि॑ऽरणाय	अविरत्यै	निरन्तरताके लिए
पू॒र्वीः	सम्प्रदायानाम् (आ० को०, षष्ठयर्थे द्वितीया)	सम्प्रदायों की
भि॒नत्	विदारयन्	तोड़ता हुआ
पु॑रः	पुराणि	गढ़ों को
न	इव	की न्याईं
भिद॑ः	भिन्नवानसि	छिन्न भिन्न किया है
अदे॑वीः	देवशून्याः	नास्तिक (प्रजाओं) को
न॒नम॑ः	अनमयः	तूने झुकाया है
वध॑ः	आयुधम्	शस्त्र को
अदे॑वस्य	देवशून्यस्य	देवशून्य के
पी॒याः	निन्दकस्य (ऋ०१।४७।२)	निन्दक के

संस्कृतार्थः।

हे इन्द्र! तं तव सनातनम् आकाशसम्बन्धि पराक्रमम् सम्प्रदायानामविरत्यै नूतनाः (ऋषयः) प्राप्तवन्तः, (त्वम्) पुराणि विदारयन्निव देवशून्याः (प्रजाः) भिन्नवानसि, देवशून्यस्य निन्दकस्य आयुधम् (च) अनमयः ॥ ८ ॥

भाषार्थः।

हे इन्द्र! आपके उस सनातन आकाश संबंधी पराक्रम को सम्प्रदायों की निरन्तरता के लिये नए (ऋषियों) ने प्राप्त किया है, आपने गढ़ों को तोड़ते हुए की न्याईं नास्तिक (प्रजाओं) को छिन्न भिन्न किया है (और) देवशून्य निन्दक के शस्त्र को नीचे किया है ॥ ८ ॥

'आकाशसम्बन्धी पराक्रम' वृत्रवध होसकता है ॥

इन्द्रोदेवता, विराट् त्रिष्टुप्छन्दः।१०।१०।११।१?

त्वंधुनिरिन्द्रधुनिमती ऋर्णोर-
पःसीरानस्रवन्तीः। प्रयत्समुद्रमति
शूरपर्षि पारयातुर्वशंयदुं स्वस्ति॥९॥

ऋ०मं०१ सू०१७४ मं०९ (४८१२)

त्वम्	त्वम्	तू
धुनि॑ः	कम्पयिता	कंपाने वाला
इ॒न्द्र॒	हे इन्द्र !	हे इन्द्र
धुनि॑ऽमतीः	रवमतीः	घर घराते हुओं को
ऋ॒णोः	अगमयः, सञ्चालितवानसि	तू ने चलाया है
अ॒पः	अपः	जलों को
सी॒राः	नदीः (निघं० १।१४।)	नदियों को
न	इव	जैसे
स्रव॑न्तीः	प्रवहन्तीः	बहती हुइयों को
प्र	प्र +	–
यत्	यदा	जब
स॒मु॒द्रम्	समुद्रम्	समुद्र को

अति॑	अति+	–
शू॒र	हे शूर !	हे बीर
पर्षि॑	प्र+अति + पर्षि, उल्लङ्घितवान् (व्यत्ययः)	तू ने उलाँघा है
पा॒रय॑	पारितवानसि (व्यत्ययः)	तू ने पार किया है
तु॒र्व॑शम्	तुर्वशम्	तुर्वश को
य॑दुम्	यदुम्	यदु को
स्व॒स्ति	कल्याणपूर्वकम्	कल्याणपूर्वक

संस्कृतार्थः ।

हे शूर ! इन्द्र ! (शत्रूणाम्) कम्पयिता त्वं रववतीरपः प्रवहन्तीर्नदारिव सञ्चालितवानसि, यदा (त्वम्) समुद्रमुल्लङ्घितवान् (तदा) तुर्वशं यदुम् (च) कल्याणपूर्वकं पारितवानसि ॥ ९ ॥

भाषार्थः ।

हे वीर ! इन्द्र ! (शत्रुओं के) कम्पाने वाले आपने घर घरात हुए जलों को बहती हुई नदियों

की न्याईं चलाया है, जब आपने समुद्र को उलाँघा (तब) तुर्वश (और) यदु को पार लंघाया ॥ ९ ॥

तुर्वश और यदु के लिये देखो पृ०९४०

इन्द्रोदेवता, निचृत्त्रिष्टुप्छन्दः ।१०।१०।११।११

त्वम॒स्माक॑मिन्द्रवि॒श्वध॑स्या अवृ॒क॑तमोन॒रांनृ॑पा॒ता । सनो॒विश्वा॑सां
स्पृ॒धांस॑हो॒दा वि॒द्यामे॒षंवृ॒जनंजी॒रदा॑नुम् ॥ १० ॥

त्वम्	त्वम्	तू
अ॒स्माक॑म्	अस्माकम्	हमारा
इ॒न्द्र॒	हे इन्द्र !	हे इन्द्र
वि॒श्वध॑	सर्वदा	सदा

स्याः	स्याः	तू हो
अवृकऽतमः	अहिंसकतमः	नितान्त हिंसा से रहित
नराम्	नराणाम्	मनुष्यों का
नृऽपाता	रक्षकः	रक्षक
सः	सः	वह
नः	अस्मभ्यम्	हम को
विश्वासाम्	सर्वेभ्यः (पञ्चम्यर्थे षष्ठी)	सब से
स्पृधाम्	स्पर्धमानेभ्यः (,, ,,)	युद्ध के लिए सामने आने वालों से
सहःऽदाः	जयप्रदः	जिताने वाला
विद्याम	प्राप्नुयाम	हम प्राप्त करें
इषम्	अन्नम्	अन्न को

वृजनम्	बलम्	बल को
जीरऽदानुम्	शीघ्रदानशीलताम्	शीघ्र दान देने के स्वभाव को

संस्कृतार्थः।

हे इन्द्र ! त्वं सर्वदा अस्माकं भव,(त्वम्) नराणाम् अहिंसकतमो रक्षकः (असि) सः(त्वम्) सर्वेभ्यः स्पर्धमानेभ्य अस्मभ्यं जयप्रदः(असि) (वयम्)अन्नंबलं शीघ्रदान शीलताम् (च) प्राप्नुयाम ॥ १० ॥

भावार्थः।

हे इन्द्र! आप सदा हमारे हों, आप मनुष्यों के अत्यन्त हिंसा रहित रक्षक (हैं) वह आप हमको सब युद्ध के लिये सामने आने वालों से जिताने वाले हैं, हम अन्न को, बल को (और) शीघ्र दान देने के स्वभाव को प्राप्त करें ॥ १० ॥

इतिचतुःसप्तत्यधिकशततमं सूक्तम् ।

ऋ० मं० १ सू० १७५

इन्द्रोदेवता, अगस्त्यऋषिः ।

विनियोगः–

१-३ । द्वितीये स्वर सामनिआद्यस्तृचः स्तोत्रियः (आ०८।५।१२)

सूक्त का भावार्थ ।

हे इन्द्र ! आपने पात्र में भरे हुए मदकारक पान की न्याईं महत्त्व को पीया है, इस लिए आप मदसे युक्त हैं, सहस्रोंको जीतने वाला वीर्यवान और वेगयुक्त सोम आप वीर के लिये है ॥१॥ हे इन्द्र! हमारा मद कारक, कामना करने योग्य, वीर्यवान पान आप को ही प्राप्त हो, जो आप बलवान, धन को जिताने वाले, शत्रु की सेना को दबाने वाले और मरण से रहित हैं ॥ २ ॥ हे इन्द्र ! शूरवीर, धन को जीतने वाले और बलवान आप ही युद्धमें मनुष्य के रथ को प्रेरते हैं, आप व्रतहीन दस्यु को ऐसे जलावें जैसे पात्र को ज्वाला से ॥ ३ ॥ हे बुद्धिमान इन्द्र ! ऐश्वर्य को प्राप्त करते हुए आप सूर्य के पहिये को बल से चुरावें और वधरूप कुत्स को वायु के घोड़ों द्वारा शुष्ण के लिये लावें ॥ ४ ॥ हे इन्द्र ! आप का मद अत्यन्त बलवान और आप का संकल्प अत्यन्त यश वाला है, इनको आज्ञा दें कि शत्रु को मारें और धन को प्राप्त करावें ॥ ५ ॥ हे इन्द्र ! जिस प्रकार आप प्यासे के लिये जल की न्याईं प्राचीन स्तोताओं के लिये सुखरूप हुए हो, उस स्तुति को अनुसरण करके मैं आप को बारंबार बुलाता हूं, हम अन्न को बल को और शीघ्र दान देने के स्वभाव को प्राप्त करें ॥ ६ ॥

ऋ०मं०१ सू०१७५मं०१ (४८१८)

इन्द्रोदेवता,निचृत्स्कन्धोग्रीवीबृहतीछन्दः ८।१२।७।८

मत्स्यपा॑यिते॒मह॒ः पात्र॑स्येव

हरिवोमत्स॒रोम॑दः । वृषा॑ते॒वृष्ण॒

इन्दु॑र्वा॒जीस॑हस्र॒सात॑मः ॥ १ ॥

मत्सि॑	मादयसि	तू मद से युक्त है
अपा॑यि	अपायि	पीया गया है
ते॒	त्वया (तृतीयार्थे षष्ठी)	तुझ से
म॑हः	महत्त्वम् (आ०को०)	महत्त्व
पा॑त्रस्यऽइव	पात्रस्येव	पात्र का मानो
ह॒रि॒ऽव॒ः	हे अश्वोपेत !	हे घोड़ों से युक्त
म॒त्स॒रः	मदकारकम्	मदकारी

मदः	पानम्	पान
वृषा	वीर्यवान्	वीर्यवान्
ते	तुभ्यम्	तेरे लिये
वृष्णे	वीराय	बीर के लिये
इन्दुः	सोमः	सोम
वाजी	वेगयुक्तः	वेग युक्त
सहस्रसातमः	सहस्रस्य जेता	हजारोंके जीतने वाला

संस्कृतार्थः ।

हे अश्वोपेत ! (इन्द्र !) त्वया पात्रस्य मदकारकं पानमिव महत्त्वमपायि (अतः) माद्यसि, वीर्यवान् वेगयुक्तःसहस्रस्यजेता (च) सोमःतुभ्यं वीराय (एवास्त) ॥१॥

भाषार्थः ।

हे घोड़ों वाले (इन्द्र!) आपने पात्रके मद करने

वाले पान की न्याईं महत्त्व को पीया है (इसलिये) आप मद से युक्त हैं, वीर्यवान् वेगसे युक्त (और) सहस्रों के जीतने वाला सोम आप वीर के लिये (ही है) ॥ १ ॥

इन्द्रोदेवता, अनुष्टुप्छन्दः ।८।८।८।८

आनस्तेगन्तुमत्सरो वृषाम-
दोवरेण्यः । सहावाँइन्द्रसानसिः
पृतनाषाडमर्त्यः ॥ २ ॥

आ	खलु	सचमुच
नः	अस्माकम्	हमारा
ते	तुभ्यम्	तेरे लिये
गन्तु	आ+गन्तु, प्राप्नोतु	आवे

मत्सरः	मदकारकम्	मदकारी
वृषा	वीर्यवत्	वीर्य वाला
मदः	पानम्	पान
वरेण्यः	वरणीयम्	वरने योग्य
सहऽवान्	बलवान्	बल वाला
इन्द्र	हे इन्द्र !	हे इन्द्र !
सानसिः	धनस्य लब्धा	धनके प्राप्त कराने वाला
पृतनाषाट्	शत्रुसेनायाअभिभविता	शत्रुओं की सेना के दबाने वाला
अमर्त्यः	मरणरहितः	मरण से रहित

संस्कृतार्थः ।

हे इन्द्र ! अस्माक मदकारकं वरणीयं वीर्यवत् (च) पानं तुभ्यं खलु प्राप्नोतु (यस्त्वम्) बलवान्,

धनस्य लब्धा, शत्रुसेनाया अभिभावता, मरण रहितः (चासि) ॥ २ ॥

भाषार्थः ।

हे इन्द्र ! हमारा मद करने वाला, बरने योग्य (और) वीर्य से युक्त पान सचमुच आप को प्राप्त हो, (जो आप) बलवान, धन के प्राप्त कराने वाले, शत्रु की सेना के दबाने वाले (और) मरण से रहित हैं ॥ २ ॥

इन्द्रोदेवता, अनुष्टुप् छन्दः । ८।८।८।८

त्वँहिशूरःसनिता चोदयोमनुषो
रथम् । सहावाँदस्युमव्रतमोषः
पात्रंनशोचिषा ॥ ३ ॥

त्वम्	त्वम्	तू
हि	खलु	सचमुच
शूरः	शूरः	शूरवीर

सनि॑ता	लब्धा	प्राप्त करने वाला
चो॒दय॑ः	प्रेरितवानसि	तूने प्रेरण किय
मनु॑षः	मनुष्यस्य	मनुष्य के
रथ॑म्	रथम्	रथ को
स॒हऽवा॑न्	बलवान्	बलवान
दस्यु॑म्	दस्युम्	दस्यु को
अ॒व्र॒तम्	व्रतरहितम्	नियमसे रहित को
ओष॑ः	दह	तू जला
पात्र॑म्	पात्रम्	पात्र को
न	इव	जैसे
शो॒चिषा॑	ज्वालया	लाट से

संस्कृतार्थः ।

(हे इन्द्र !) शूरः (धनस्य) लब्धा बलवान् (च) त्वं खलु मनुष्यस्य रथं प्रेरितवानसि (त्वम्) ज्वालया पात्रमिव व्रतरहितं दस्युं दह ॥ ३ ॥

भाषार्थः ।

(हे इन्द्र !) सचमुच शूरवीर, धनके प्राप्त करने वाले (और) बलवान् आपने मनुष्य के रथ को प्रेरण किया है, आप नियम से रहित दस्यु को जलाओ जैसे पात्र को ज्वाला से ॥ ३ ॥

"मनुष्य के रथ को प्रेरण किया है" अर्थात् युद्ध में धन को जीतने की शक्ति और शौर्य को मनुष्य ने इन्द्र की सामर्थ्य से ही प्राप्त किया है ॥

इन्द्रोदेवता, विराडनुष्टुप्छन्दः ।८।८।७।७

मु॒षा॒यसूर्यं॑कवे च॒क्रमीशा॑न॒
ओज॑सा । वह॒शुष्णा॑यव॒धं कुत्सं॒
वात॒स्याश्वैः॑ ॥ ४ ॥

(४८२५) ऋ०मं०१ सू०१७५ मं०४

मु॒षा॒य	मुषाण (छन्दसिशायजादेशः)	तू चुरा
सूर्य॑म्	सूर्यसम्बन्धि	सूर्य संबंधी को
क॒वे॒	हे मेधाविन्!	हे बुद्धिमान
च॒क्रम्	चक्रम्	पहिये को
ई॒शा॑नः	ऐश्वर्यं प्राप्नुवन्	ऐश्वर्य को प्राप्त करता हुआ
ओज॑सा	बलेन	बल से
य॑च्छ	प्रापय	तू ला
शुष्णा॑य	शुष्णाय	शुष्ण के लिये
व॒धम्	वधरूपम्	वधरूप को
कुत्स॑म्	कुत्सम्	कुत्स को
वात॑स्य	वायोः	वायु के

ऋ०मं०१ सू०१७५ मं०५ (५८२१)

अश्वैः	अश्वैः	घोड़ों द्वारा

संस्कृतार्थः।

हे मेधाविन् ! (इन्द्र !.) (त्वम्) ऐश्वर्यं प्राप्नुवन् (सन्) सूर्यसम्बन्धि चक्रं बलेन मुषाण, वधरूपं कुत्सम् (च) वायोरश्वैःशुष्णाय प्रापय ॥ ४ ॥

भाषार्थः ।

हे बुद्धिमान ! (इन्द्र !) ऐश्वर्य को प्राप्त करते हुए आप सूर्य के पहिये को बल से चुरावें, (और) वध रूप कुत्सको वायु के घोड़ों द्वारा शुष्ण के लिये लावें ॥ ४ ॥

‘शुष्ण’ जगत को सुकाने-वाला अकालहै, जिस को नाशकरने के लिए इन्द्र ने सूर्य्य के पहिये को चुराया था अर्थात बादलों द्वारा छिपाया था. इस कर्म में वायु के घोड़े सहायक थे जो समुद्र से बादलों को हांक कर लाए, ओर कुत्स ऋषि भी सहायक थे जिन की प्रार्थना से इन्द्र ने अकाल को दूर किया था ॥

इन्द्रोदेवता, अनुष्टुप्छन्दः।८।८।८।८

शुष्मिन्तमोहितेमदो द्युम्नि-

न्त॑मउ॒तक्रतु॑ः।वृ॒त्र॒घ्नाव॑रिवो॒विदा॑-

मंसी॒ष्ठा॑श्व॒सात॑मः। ५।

शु॒ष्मिन्ऽत॑मः	बलवत्तमः	अत्यन्त बल से युक्त
हि	खलु	सचमुच
ते॒	तव	तेरा
मद॑ः	मदः	मद
द्यु॒म्निन्ऽत॑मः	यशस्वितमः	अत्यन्त यशवाला
उत	च	और
क्रतु॑ः	सङ्कल्पः	संकल्प

वृत्रऽहना	वृत्रस्य घातिनौ	वृत्र के मारने वालों को
वरिवःऽविदा	धनस्य लब्धारौ	धन के प्राप्त करने वालों को
मंसीष्ठाः	अनुजानीहि (लोडर्थेलुङ्)	आज्ञा दो
अश्वऽसातमः	अश्वप्रदः	घोड़ों के देने वाला

संस्कृतार्थः।

(हे इन्द्र !) तव मदो बलवत्तमो सङ्कल्पश्च यशस्वितमः खलु, अश्वप्रदः (त्वम्) वृत्रस्य घातिनौ धनस्य लब्धारौ (च तौ) अनुजानीहि ॥५॥

भाषार्थः।

(हे इन्द्र !) सचमुच आपका मद अत्यन्त बलवान् और संकल्प अत्यन्त यशवाला (है) घोड़ों के देने वाले आप (उन) वृत्रके मारने वाले (और)धनके प्राप्त करने वालों को आज्ञा दें ॥ ५ ॥

इन को मारने वाला मद और धनके प्राप्त करने वाला संकल्प ॥

(४८२१) ऋ०मं०१ सू०१७५ मं०६

इन्द्रो देवता, जगती छन्दः।१२।१२।१२।१२

यथापूर्वेभ्योजरितृभ्यइन्द्र म-
यइवापोनतृष्यतेबभूथ। तामनुत्वा
निविदंजोहवीमि विद्यामेषंवृजनंजी-
रदानुम् ॥ ६ ॥

यथा	यथा	जिस प्रकार
पूर्वेभ्यः	पुरातनेभ्यः	प्राचीनों के लिये
जरितृऽभ्यः	स्तोतृभ्यः	स्तोताओं के लिये
इन्द्र	हे इन्द्र !	हे इन्द्र
मयःऽइव	सुखमिव	सुख की न्याईं
आपः	आपः	जल

न	इव	जैसे
तृष्यते	तृषार्ताय	प्यासे के लिये
बभूथ	अभवः	तू हुआ है
ताम्	ताम्	उस को
अनु	अनुसृत्य	अनुसरण करके
त्वा	त्वाम्	तुझ को
निऽविदम्	स्तुतिम्	स्तुति को
जोहवीमि	पुनःपुनराह्वयामि	बार२ बुलाताहूँ
विद्याम	प्राप्नुयाम	हम प्राप्त करें
इषम्	अन्नम्	अन्न को
वृजनम्	बलम्	बल को

जीरऽदानुम्	शीघ्रदानशीलताम्	शीघ्र दान देने के स्वभाव को

संस्कृतार्थः ।

हे इन्द्र ! (त्वम्) येन प्रकारेण पुरातनेभ्यः स्तोतृभ्यः सुखमिव अभवः यथा तृषार्ताय आपः (भवन्ति) तां स्तुतिमनुसृत्य (अहम्) त्वां पुनःपुनराह्वयामि, (वयम्) अन्नं बलं शीघ्रदानशीलताम् (च) प्राप्नुयाम ॥ ६ ॥

भाषार्थः ।

